# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

कक्षा - शास्त्री-३ ( Sem_6 ) प्रश्नपत्र-८ गुणाः - ७०

विषयः - पुराणेतिहासः CE 3.6.12 समयः - ११:०० तः ०२:००

दिनाङ्कः - २६-०४-२०१६ सन्दर्भग्रन्थः -महाभारते आपद्धर्मपर्व

---

### युनिट-१

**प्रश्नः -१ पद्यद्वयं ससन्दर्भं व्याख्यायताम् ।** ०८

*(१) सर्वथा स्त्री न हन्तव्या सर्वसुत्त्वेषु केनचित् ।*
*नित्यं तु ब्राह्मणे स्वस्ति योद्धव्यं च तदर्थतः ॥*

*(२) अनागतविधाता च प्रत्युत्पन्नमतिस्तथा ।*
*द्वावेव सुखमेधेते दीर्घसूत्री विनश्यति ॥*

*(३) सा भार्या या प्रियं ब्रूते स पुत्रो यत्र निर्वृतिः ।*
*तन्मित्रं यत्र विश्वासः स देशो यत्र जीव्यते ॥*

**प्रश्नः -२ वैरस्य मुख्यानि कानि पञ्चकारणानि भवन्ति तत् ग्रन्थानुसारं सप्रमाणं विवेचयत ।** ०८

**अथवा**

**पूजनीवृत्तान्तं सविस्तरं विवेचयत ।**

**प्रश्नः -३ टिप्पणीद्वयं लिखत ।** ०४

*(१) मूषकमार्जारकथा ।* *(२) कायव्यदस्युः ।*

*(३) त्रयो मत्स्याः ।* *(४) राज्ञाम् आपद्धर्मः ।*

**प्रश्नः -४ पञ्चानां लघूत्तराणि लिखत ।** ०५

*(१) आपद्धर्मपर्व कस्मिन् पर्वणि आयाति ?*

*(२) 'दस्युवृत्तिः' नाम किम् ?*

*(३) दीर्घसूत्री कः आसीत् ?*

*(४) साप्तपदं मैत्रं नाम किम् ?*

*(५) ब्रह्मदत्तः कः आसीत् ?*

*(६) नराः पक्षिणः कस्मान् वाञ्छन्ति ?*

*(७) "अक्षाः" इत्यस्य कोऽर्थः ?*

### युनिट-२

**प्रश्नः -५ पद्यद्वयं ससन्दर्भं व्याख्यायताम् ।** ०८

*(१) ब्रह्महत्यापनोदार्थमपृच्छद् ब्राह्मणान् वहन् ।*
*पर्यटन् पृथिवीं कृत्स्नां देशे देशे नराधिपः ॥*

*(२) तस्माद् वैरं न कुर्वीत दुर्बलो वलवत्तरैः ।*
*शोचेद्धि वैरं कुर्वाणो यथा वै शाल्मलिस्तथा ॥*

*(३) पापस्य यदधिष्ठानं तच्छणुष्व नराधिपः ।*
*एको लोभो महाग्राहो लोभात पापं प्रवर्तते ॥*

**प्रश्नः -६ सेमलवृत्तान्तं सविस्तरं सबोधं विवेचयत ।** **०८**

**अथवा**

**कपोकथां सविस्तरं लिखत ।**

**प्रश्नः -७ चत्वारि लघूत्तराणि दत्त ।** **०४**

*(१) लुब्धकः नाम कः ?*
*(२) कपोतकथायाः कः बोधः ?*
*(३) "शाकुनिकः" इत्यस्य कोऽर्थः ?*
*(४) जनमेजयस्य कः दोषः ?*
*(५) षष्ठं सुचरितं किं कथ्यते ?*
*(६) नारदेन कः पृष्टः ?*

**युनिट-३**

**प्रश्नः -८ पद्यद्वयं ससन्दर्भं व्याख्यायताम् ।** **०८**

*(१) दमं निःश्रेयसं प्राहु वृद्धा निश्चितदर्शिनः ।*
*ब्राह्मणस्य विशेषेण दमो धर्मः सनातनः ॥*

*(२) सत्यं धर्मस्तपो योगः सत्यं ब्रह्म सनातनम् ।*
*सत्यं यज्ञः परः प्रोक्तः सर्वं सत्ये प्रतिष्ठितम् ॥*

*(३) ब्राह्मणेभ्यः प्रदायाग्रं यः सुहृद्भिः सहाश्नुते ।*
*स प्रत्ये लभते स्वर्गमिह चानन्त्यमश्नुते ॥*

**प्रश्नः -९ गौतमवृत्तान्तं सविस्तरं लिखत ।** **०८**

**अथवा**

**विरूपाक्षराजधर्मणोः मैत्रीं वर्णयत ।**

**प्रश्नः -१० टिप्पणीद्वयं लिखत ।** **०४**

*(१) आतिथ्यम् ।*
*(२) त्रयः पुरुषार्थाः ।*
*(३) मित्रलक्षणानि ।*
*(४) वर्णधर्माः ।*

**प्रश्नः -११ पञ्चानां लघूत्तराणि लिखत ।** **०५**

*(१) प्रथमः पुरुषार्थः कः ?*
*(२) आद्यः वर्णः कः ?*
*(३) कामस्य महत्त्वं केन कथ्यते ?*
*(४) कीदृशं मित्रं 'सुहृत्' कथ्यते ?*
*(५) 'भीमः' इत्यस्य कोऽर्थः ?*
*(६) "अर्जुनः" इत्यस्य शाब्दिकोऽर्थः कः ?*
*(७) अर्थसिद्धिः कतिविधा प्रोक्ता ?*

---------------------